CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

*Bhāratīya Vidyā Series No. 12*

# VEDABHĀṢYASĀRA

OF

## BHAṬṬOJI DĪKṢITA

EDITED BY

PANDIT R. N. PATANKAR

WITH INTRODUCTION BY

PROF. P. K. GODE

47

*BHARATIYA VIDYA BHAVAN*

BOMBAY

V. S. 2003 ] Rupee One [ A. C. 1947

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

*Bhāratīya Vidyā Series No. 12*

# VEDABHAṢYASARA

OF

## BHAṬṬOJI DIKṢITA

EDITED BY

PANDIT R. N. PATANKAR

WITH INTRODUCTION BY

PROF. P. K. GODE

PUBLISHED BY

PROF. J. H. DAVE

HON. REGISTRAR




*BHARATIYA VIDYA BHAVAN*

BOMBAY

V. S. 2003 ] Rupee 1 [ A. C. 1947

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

# OTHER PUBLISHED WORKS OF THIS SERIES

*Visuddhimagga*, of Buddhaghosācāriya, 4th century Pali work on Buddhism, ed. Prof. Dharmananda Kosambi—Roy. 8vo. pp. xviii+512. Rs. 16.

*Bharates'vara Bāhubalirāsa*, oldest Gujarati poem, ed. Acharya Jinavijayaji—Roy. 8vo. pp. 24. Re. 1.

*Jñānadīpika Mahābhāratatātparyaṭika* on the Udyogaparvan, by Devabodha, oldest known commentary on the epic, ed. Dr. S. K. De, Roy. 8vo. pp. xvi+74, Rs. 4.

भगवद्गीता भारतीयदर्शनानि च by Mm. Anantakrishna Shastri, a treatise in Samskrit showing how each of the dars'anas finds its doctrines advocated by the Gītā. Crown quarto pp. 100, Rs. 4.

*Candralekhāsaṭṭaka*, 17th century Prakrit Drama by Rudradāsa, critically edited by Dr. A. N. Upadhye, Roy. 8vo., pp. 96+72, Rs. 8.

*Gujarāti Svaravyañjana Prakriyā*, Gujarati translation by, Prof. K. K. Shastri of Prof. R. L. Turner's 'Gujarati Phonology', Roy, 8vo., pp. 66, Rs. 2.

*Vedavādadvātrims'ikā* of Siddhasenadīvākara, giving a synthesis of the Vedic schools, ed. Pandit Sukhlalji, Roy. 8vo pp. 44, Re. 1.

*Rasaratnapradīpikā* of Allarāja, 13th century Samskrit work on Alaṅkāra and erotics, critically edited by Dr. R. N. Dandekar. Roy. 8vo. pp. 60+32, Rs. 3.

*S'atakatrayī* of Bhartṛhari with a new commentary of an unknown author, critically edited by Prof. D. D. Kosambi Roy. 8vo. pp. 208, Rs. 6.

*Anyoktyaṣṭakasaṃgraha*, a compilation by an unknown author of 138 Anyoktis and Subhāṣitas in Samskrit with marginal glosses, edited by Miss Pratibha Trivedi, Roy. 8vo. pp. 50, Rs. 2.

*Purāṇic Words of Wisdom*, edited by A. P. Karmarkar, A collection of Subhāṣitas from the eighteen Purāṇas, Roy, 8vo. pp. 70, Rs. 2.

**BHARATIYA VIDYA BHAVAN**
**Chowpatty Road, BOMBAY 7**

Published by Prof. Jayantakrishna H. Dave, Hon. Registrar, Bharatiya Vidya Bhavan, 33-35, Harvey Road, Bombay 7.

Printed by Ramchandra Yesu Shedge, at the Nirnaya Sagar Press, 26-28, Kolbhat Street, Bombay 2

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

# A RARE MANUSCRIPT OF THE VEDABHĀṢYASĀRA OF BHAṬṬOJI DĪKṢITA

By P. K. GODE, M. A.

In the list of works recorded by Aufrecht in his *Catalogus Catalogorum* under the entry[1] "भट्टोजिदीक्षित" no work of the name "वेदभाष्य" or 'वेदभाष्यसार"' is recorded. Rao Bahadur W. A. Bambardekar also makes no mention of any such work in his recent work[2] on Bhaṭṭoji while giving a complete list[3] of Bhaṭṭoji's works. In view of these facts and in view also of the absence of reliable data regarding Bhaṭṭoji's life and personality I was interested to know from Pandit Raghunātha Kṛṣṇa Pāṭankar of Rajapur[4] that he has come across a rare MS. of *Vedabhāṣyasāra* of Bhaṭṭoji. Paṇḍit Pāṭankar was also kind enough to send me a copy of this MS. made by himself together with a description[5] of the original.[6] Realizing the importance of this work for the history of Sanskrit literature in general and for the history of Bhaṭṭoji's works in particular, I take this opportunity of thanking Paṇḍit Pāṭankar for the materials for this paper sent by him and at the same time acquainting all

---

1 CC, I. p. 325.

2 *Bhaṭṭoji Dīkṣita Jñātiviveka*, Bombay, 1939.

3 I note here for ready reference the names of 34 works ascribed to Bhaṭṭoji as given by Rao Bahadur Bambardekar:
अद्वैतकौस्तुभ, आचारप्रदीप, आशौचनिर्णय, आह्निकम्, कारिका, कालनिर्णयसंग्रह, गोत्रप्रवरनिर्णय, चतुर्विंशतिमुनिवरव्याख्या, चन्दनधारणविधि, जातकालङ्कार, तत्वकौस्तुभ, तत्वविवेकदीपनव्याख्या, तन्त्रसिद्धान्तदीपिका, तन्त्राधिकारनिर्णय, तर्कामृतम्, तिथिनिर्णय, तिथिनिर्णयसंक्षेप, तिथिप्रदीप, तीर्थयात्राविधि, त्रिस्थलीसेतुसारसंग्रह, तैत्तिरीयसंध्याभाष्य, दशश्लोकीव्याख्या, दायभाग, धातुपाठनिर्णय, प्रायश्चित्तविनिर्णय, प्रौढमनोरमा, बालमनोरमा, भट्टोजिदीक्षितीय, भट्टोजिभट्टीय, मासनिर्णय, लिङ्गानुशासनवृत्ति, शब्दकौस्तुभ, श्राद्धकाण्ड, सिद्धान्तकौमुदी. The authorship of Bhaṭṭoji in the case of many of the above works is well known. It is worth while examining doubtful cases.

4 In the Ratnagiri District of the Bombay Presidency, Pt. Pāṭankar is associated with the the Sanskrit Pathashala at Rajapur. There is a Collection of Sanskrit MSS. at this Pathashala.

5 The MS. of *Vedabhāṣyasāra* is old and in a decaying condition. It was procured by Pt. Pāṭankar from his guru, the late Bāls'āstri Māiṇkar of Khārepātaṇ at some distance from Rajapur. The full name of Bāls'āstri is "Bālakṛṣṇa Lakṣmaṇa Maiṇkar."

6 The original MS. is now deposited with the Sanskrit Pāthashala Rajapur.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


students, of Sanskrit literature with the contents of this work in brief.

The copy of the *Vedabhāṣyasāra* before me consists of 16 foolscap pages (about 29 lines to a page) and begins as follows:

"ॐ

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
माधवाचार्य[1]रचिताद्वेदभाष्यमहार्णवात् ।
श्रीभट्टोजीदिक्षितेन सार उद्धियतेधुना ॥ २ ॥
एतस्मिन्प्रथमोध्यायः श्रोतव्यः संप्रदायतः ।
व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति शुद्धधीः ॥ ३ ॥

अध्ययनविधेरर्थावबोधपर्यंतं व्यापार इति भाट्टादिमते अर्थज्ञानमावश्यकमिति स्पष्टमेव अक्षरग्रह.....इति विवरणाचार्यादिमतेपि" etc.

The colophons of the *12 vargas* of the work are as follows:

*Page* 5—"समाप्तो वर्गः"
" 6—"द्वितीयो वर्गः"
" 7—"तृतीयो वर्गः"
" 8—"चतुर्थो वर्गः"
" 9—"पंचमो वर्गः"
" 10—"षष्ठो वर्गः"
" 11—"सप्तमो वर्गः"
" 12—"अष्टमो वर्गः"
" 13—"नवमो वर्गः"
" 14—"दशमो वर्गः"
" 15—"एकादशो वर्गः"
" 16—"इति द्वादशो वर्गः ॥ शिवाय नमः ॥

The evaluation of present work must be left to the students of Sanskrit grammar as the comments of Bhaṭṭoji set forth herein are preponderantly grammatical. That the present work is Bhaṭṭoji's own production is proved by verse 3 quoted above, which explicitly states that Bhaṭṭoji Dīkṣita has composed this *Sāra* on the basis of the *Vedabhāṣya* of Mādhavācārya. In the history of

1 Paṇdit Pāṭankar's remarks on this manner of mentioning the author of the *Vedbhāṣyasāra* may be noted here:

"दीक्षितैः स्वीयव्याकरणग्रंथे श्रीवेदभाष्यकाराणां माधवाचार्याणां यत्र स्वमतसमर्थने समुल्लेखः क्रियते तत्र "वेदभाष्यकाराः" इति सादरं उच्यते, यत्र तेषां खण्डनं तत्र "यत्तु माधवेनोक्तं" इति सामान्यतो ऐकवचनं विधीयते." If this observation is correct we must regard the great grammarian as a "singular" controversialist in line with other great Paṇdits of his age.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


the commentators of the Veda this work of Bhaṭṭoji though brief may have its own place in view of Bhaṭṭoji's reputation as a grammarian. My interest in the present work is purely of a historical nature as I have been studying of late the historical background of Bhaṭṭoji and his pupils and have published so far[1] some papers pertaining to this field.

Bhaṭṭoji refers to the following works and authors in his *Vedabhāṣyasāra.*

(1) माधवाचार्य P. 1.
(2) वेदभाष्य (माधवाचार्यरचित), P. 1.
(3) भाट्टादिमते, P. 1.
(4) विवरणाचार्यादिमते, P. 1.
(5) महाभाष्य, P. 1.
(6) स्मर्यते, P. 1.
(7) सूत्रकार, P. 2.
(8) ऋग्विधान, P. 2.
(9) श्रुतेः, P. 2.
(10) प्रातिशाख्यात्, P. 3, 7.
(11) तैत्तिरीयाः, P. 3.
(12) हरदत्तः, P. 5.
(13) यास्कः, P. 7. 8.
(14) उत्तररत्ने,[2] P. 14. ("पक्षसी तु स्मृतौ पक्षावित्युत्तररत्ने")

I have recorded above whatever data could be gathered from the copy[3] of the MS. supplied to me by Pandit Raghunāth

---

1 These papers are: (1) *A New Approach to the Date of Bhaṭṭoji Dīkṣita* (*Annals*, Tirupati, S. V. Ori. Institute, Vol. 1, pt. 2. pp. 117–127) and (2) *Varadarāja, a pupil of Bhaṭṭoji Dīkṣita and His Works—Between A. D. 1600 and 1650* (*Festschrift, Prof. P. V. Kane*, 1941, pp. 188–199) I have projected a paper on Nīlakaṇṭha S'ukla *another pupil of Bhaṭṭoji Dīkṣita* who wrote between 1637 and 1656 A. D.

2 "उत्तररत्ने" is possibly a mis-reading for "उत्तरतन्त्रे" vide my note on उत्तरतन्त्र (*Annals*, B. O. R. Institute, Vol. XXI, 1940, p. 133 footnote 1). उत्तरतन्त्र is part of a lost work on lexicography. It is mentioned by Nārāyaṇa Dīkṣita in his Commentary on the *Vāsavadattā*, which I have assigned to the period "*between A. D. 1250 and 1550.*" See also Aufrecht CC, 1, 63. Bhaṭṭoji's reference to उत्तरतन्त्र evidently supports my evidence, उत्तरतन्त्र is not recorded by Prof. Rāmāvatāra Śarmā in his list of *Kośas* (Pages LV-LXII of Intro. to *Kalpadru-Kos'a*, Vol. I, G. O. S. Baroda. 1928). Perhaps someday we may recover this lexicon.

3 Since this paper was drafted Pt. Pāṭankar has sent me the original MS. of the *Vedabhāṣyasāra.* It consists of 9 folios (Size: $11\frac{1}{2}'' \times 4\frac{3}{4}''$); 14 lines

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


S'āstrī Patankar and I now leave it to scholars to see if the present MS. is a fragment of a larger work of Bhaṭṭoji of the title *Vedabhāśyasāra* or is a complete work by itself. It is also necessary to examine other works of Bhaṭṭoji with a view to see if he has quoted this *Vedabhāṣyasāra*[1] in any of them,

---

to a page, 55 letters to a line. The MS. is written legibly on country paper. It is quite old and worn out. It appears to be about 250 years old and may belong to the 17th century.

1 Dr. V. Raghavan of the Madras University of whom I inquired about other MSS. of this work writes on 3-7-1941: "We are not able to find any other MS. of a *Vedabhāṣyasāra* by Bhaṭṭoji Dīkṣita.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

# प्रास्ताविकम् ।

ॐ ऋचो अक्षरे परमे व्योमन्
यस्मिन्देवा अधि विश्वे निषेदुः ॥
यस्तन्न वेद किमृचा करिष्यति
य इत्तद्विदुस्त इमे समासते ॥

अस्त्यर्वसागरोपान्ते पूर्वस्यां दण्डकं वनम् ।
सह्याद्रेश्चात्र प्रतीच्यां देशः कौङ्कणसंज्ञकः ॥
विश्रुतं प्राक्तनात्कालाद्यत्रास्ति नगरं शुभम् ।
नाम्ना राजापुरं नद्योः संगमे सागरस्य च ॥
राजते यत्र पूर्वस्यां गङ्गा शैलकटीतटे ।
चतुर्दशसु कुण्डेषु प्रादुर्भवत्यभीक्ष्णशः ॥
पादेऽनादिश्चोष्ण उत्सो नातिदूरं नदीतटात् ।
धूतपापेश्वरः श्रीमानार्तत्राणपरायणः ॥
शङ्करो यस्य प्रतीच्यां स्वयम्भूस्तटिनीतटे ।
नगरेऽत्राब्दशतार्धात्प्राक् संस्था संस्थापिता शिवा ॥
श्रीसंस्कृता पाठशाला श्रीमद्बोद्वण्करामिधैः ।
अधीतिभिरनन्ताख्यैरुद्यमव्यवसायिभिः ॥
तत्रालयः संस्कृतानां ग्रन्थानां वरिवृत्यते ।
अयुतार्धाधिका संख्याऽधुना येषां विराजते ॥
लिखितानां मुद्रितानामन्येषामपि संस्कृतात् ।
क्षारपट्टनग्रामस्था हरिभक्तिपरायणाः ॥
श्रीपरमगुरुपादाः श्रीमन्तो बालशास्त्रिणः ।
माहृणकरान्ववायरत्नाकरसुधांशवः ॥
मूर्तिमज्ज्ञानकोशा ये नैकशास्त्रविशारदाः ।
दत्तवन्तः सहस्रार्धं ग्रंथानां विविधात्मनाम् ॥
विद्यमाना तत्र जीर्णा लिखिता पुस्तिका त्वियम् ।
ऋग्वेदभाष्यसारस्य भट्टोजीदीक्षितस्य वै ॥
माधवाचार्यऋग्वेदभाष्यं संक्षेपितं त्विह ।
केवलं तत्र वर्तन्ते वर्गा द्वादश चादिमाः ॥
शिवाय नम इत्यन्ते पुस्तिकाया विलोक्यते ।
लेखकेन ततश्चास्या लिखितं न ह्यनन्तरम् ॥
अथाप्येतावतो भागादखिलो ह्यनुमीयते ।
कृतो भट्टोजिना सारो दीक्षितेन विपश्चिता ।
माधवाचार्यभाष्याब्धिं परिचेतुं न ये क्षमाः ।
ते भूयासुरलं चास्य सारस्यापि परिग्रहात् ॥
यतितव्यं विपश्चिद्भिः सारसंपादने भृशम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



उपलब्धौ तस्य महालाभो गीर्वाणवाङ्मये ॥
जिज्ञासूनां वेदार्थस्य महत्युपकृतिर्भवेत् ।
स्थलेषु क्वचिदल्पेषु माधवो नोररीकृतः ॥
श्रीमद्भट्टोजिना "मर्याः कविक्रतु"र्निदर्शनम् ।
स्कन्दस्वामी वेङ्कटादिर्माधवो भाष्यकृद्द्वयम् ॥
प्राक्तनं माधवाचार्याद् भास्करोऽपि तथैव च ।
पुस्तिकालेखसमये स्कन्दवेङ्कटमाधवाः ॥
त्रयोऽवलोकिताः प्रायश्चेह जिज्ञासया मया ।
पाटणकरान्ववायरुक्मिणीकृष्णसूनुना ॥
सुधिया रघुनाथेन राजापुरनिवासिना ।
दत्तात्रेयजनार्दनगुरुयुग्मपदाम्बुज-
रजोजुषा द्विरेफेण विदुषामनुयायिना ।
अंगाक्षगजभूशाके भावेऽब्दे प्रतिमाऽऽदिमा ॥
द्वितीया लिखितैतर्हि वृषसंवत्सरे शुभे ।
अभ्यङ्गवसुभूशाके कार्तिके सप्तमीरवौ ॥
शुक्ले कृता मुद्रणार्थं यथामति यथायथम् ।
संयोजिता ऋचश्चात्र पदान्यपि ऋचां तथा ॥
विदुषामुपयोगार्थं नास्ति यन्मूलपुस्तके ।
इयताऽऽवेदनेनालं विस्तरो न विधीयते ॥

आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः ।
यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम ॥

---

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ हरिः ॐ ॥

# ऋक्संहिता-सपदपाठा ।

## श्रीभट्टोजीदीक्षित-प्रणीत-वेदभाष्यसारसमन्विता ।

ॐ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
माधवाचार्यरचिताद्वेदभाष्यमहार्णवात् ।
श्रीभट्टोजीदीक्षितेन सार उद्धियतेऽधुना ॥ २ ॥
एतस्मिन्प्रथमोऽध्यायः श्रोतव्यः संप्रदायतः ।
व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति शुद्धधीः ॥ ३ ॥

"अध्ययननिधेरर्थावबोधपर्यंतं व्यापार" इति भट्टादिमतेऽर्थज्ञानमावश्यकमिति स्पष्टमेव "अक्षर-ग्रह(णान्त)त्वं" इति विवरणाचार्यादिमतेऽपि "ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोऽध्येयो ज्ञेयश्च" इति महाभाष्योदाहृतवाक्यांतराद् वेदार्थज्ञानमावश्यकं । तत्र हि निष्कारणशब्देनाध्ययनज्ञानयोः काम्यत्वं वार्यते ॥ किं च ज्ञानस्तुत्यज्ञाननिंदयोस्तत्र तत्र श्रवणाद् "यत्स्तूयते तद्विधीयत" इति न्यायेनार्थज्ञानस्य विधिरभ्युपगंतव्यः । तथा च यास्कोदाहृतं श्रुतिद्वयं ।

स्थाणुरयं भारहारः किलाभू-
दधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते
नाकमेति ज्ञानविधूतपाप्मा ॥
यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

तथा "उत त्वः पश्यन्" इत्यादिमंत्रा अप्यत्रार्थे बोध्याः । तथा ऋष्यादिज्ञानमप्यावश्यकम् । तथा च श्रूयते "यो ह वा अविदितार्षेयछंदोदैवतब्राह्मणेन मंत्रेण याजयति वाध्यापयति वा स्थाणुं वर्छति गर्तं वा पद्यते प्र वा मीयते पापीयान् भवति तस्मादेतानि मंत्रे मंत्रे विद्यात्" इति । स्मर्यते च—

अविदित्वा ऋषिं छंदो दैवतं योगमेव च ।
योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु सः ॥
ऋषिच्छंदोदैवतानि ब्राह्मणार्थं स्वराद्यपि ।
अविदित्वा प्रयुंजानो मंत्रकंटक उच्यते ॥
स्वरवर्णाक्षरं मात्रा विनियोगोऽर्थ एव च ।
मंत्रं जिज्ञासमानेन वेदितव्यं पदे पदे ॥ इति ।

तत्र अग्निमीळ इत्याद्यं सूक्तं नवर्चम् विश्वामित्रपुत्रो मधुछंदा ऋषिः अग्निर्देवता गायत्री छंदः । तथा चानुक्रांतं "अग्निं नव मधुछंदा वैश्वामित्र" इति । देवताछंदसी तु परिभाषाबलेन लभ्येते ॥ मंडलादिषु "आग्नेयमैंद्रात्" इति । "आदौ गायत्रं प्राश्विरण्यस्तूपात्" इति च ॥ हिरण्यस्तूपाख्य



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



ऋषिर्येषां मंत्राणां वक्ष्यते ततः प्राचीनेषु मंत्रेषु गायत्रं छंद इत्यर्थः। विनियोगस्तु कृत्स्नस्याम्नायस्य ब्रह्मयज्ञे पारायणादौ च प्रसिद्धः। विशेषविनियोगस्तु तत्तत्कर्तौ सूत्रकारेण प्रदर्शितः। ऋग्विधानादितोऽप्यवगंतव्यः॥

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥ १॥

ॐ अग्निम्। ईळे। पुरःऽहितम्। यज्ञस्य। देवम्। ऋत्विजम्॥
होतारम्। रत्नऽधातमम्॥ १॥

अथ प्रतिमंत्रं व्याख्या। अग्निमिति अंगति ऊर्ध्वं गच्छतीत्यग्निः ऊर्ध्वज्वलनस्वभावत्वात्॥ स्वर्गे हविर्नेतुं गच्छतीति वा॥ तं देवं द्योतनादिगुणयुक्तं ईळे स्तौमि। कीदृशं। यज्ञस्य पुरोहितं पुरोभागे आहवनीयरूपेणावस्थितं। किंच होतारमृत्विजम् होतृनामकमृत्विजम्। "अग्निर्वै देवानां होता" इति श्रुतेः। अपि च रत्नधातमं यागफलरूपाणां रत्नानां अतिशयेन धारयितारं पोषयितारं वा रत्नानां धनानामिति वा। मघमित्यादिधननामसु रत्नशब्दस्य पाठात्। अगिधातोर्गत्यर्थात् "अंगेर्नलोपश्च" इत्यौणादिको निप्रत्ययः। इदित्त्वात्कृतस्य नुमागमस्य लोपश्च। प्रत्ययत्वान्निशब्दस्योदात्तता। शेषनिघातेन धातोरकारोऽनुदात्तः। अमः सुप्त्वादनुदात्तत्वेऽपि "अमि पूर्वः" इति पूर्वरूपमुदात्तम्। "एकादेश उदात्तेनोदात्त" इति सूत्रात्॥ ईळे ईड स्तुतौ लट्।

"द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकार" इति प्रातिशाख्याडुकारस्य ळकारः। "तिङ्कृतिङः" इति निघातः। संहितायां तु "उदात्तादनुदात्तस्य स्वरित" इतीकारः स्वरितः। "स्वरितात्संहितायामनुदात्तानाम्" इति एकारस्य ऐकश्रुत्यं प्रचयापरनामकं भवति॥ पुरोहितम्। "पूर्वाधरावराणामसिपुरधवश्चैषाम्" इति पूर्वशब्दादस्प्रत्ययः पुर् आदेशश्च। धाञो निष्ठायां "दधातेर्हिः"। समासांतोदात्तत्वे तदपवादे तत्पुरुषे "तुल्यार्थ–" इत्यादिनाऽव्ययपूर्वपदप्रकृतिस्वरे तदपवादे "गतिकारकोपपदात्कृत्" इति कृदुत्तरपदप्रकृतिस्वरे च प्राप्ते "गतिरनंतर" इति पूर्वपदप्रकृतिस्वरत्वम्। "पुरोऽव्ययम्" इति पुरःशब्दस्य गतित्वात् संहितायां तु आद्याक्षरस्य प्रचये प्राप्ते "उदात्तस्वरितपरस्य सन्नतर" इति अतिनीचोऽनुदात्तः। यद्यपि पदकाले हितशब्दांतर्गतस्येकारस्य स्वरितत्वं दुर्लभं उदात्तात्परत्वाभावात्। "मात्रा ह्रस्वस्तावदवग्रहांतर"मिति प्रातिशाख्येऽवसानविधानात्। अत एव तैत्तिरीया अनुदात्तमेवाधीयते तथापि "यथा संधीयमानानामनेकीभवतां स्वरः। उपदिष्टस्तथा विद्यादक्षराणामवग्रहे"। इति प्रातिशाख्येऽतिदेशादिष्टसिद्धिः॥ यज्ञस्य। "यजयाचयतविच्छप्रच्छरक्षोनङ्"। देवम् दीव्यतेः पचाद्यच्। ऋत्वौ यजतीति विग्रहे "ऋत्विग् दधृग्"ति क्विन्नंतो निपातितः। कृदुत्तरपदप्रकृतिस्वरः ऋतुशब्दस्यावांतरपदसंज्ञासत्त्वेऽपि "गोभिर्मदाय" "गोभ्यो गातु" इत्यादाविवावग्रहाभावः संप्रदायसिद्धः। ...थापदत्वाभावेऽपि ईयिवांसं तस्थिवांसं आपप्रिवान् इत्यादाववग्रहः। एवं च सत्यवांतरपदत्वेऽवग्रहस्तद्विरहे नेत्युभयमप्यौत्सर्गिकमिति बोध्यम्॥ होतारम्। जुहोतेस्तृन् "ञ्नित्यादिर्नित्य"मित्याद्युदात्तः। रत्नधातमम्। रत्नशब्दो "नञ्विषयस्यानिसंतस्य" इत्याद्युदात्तः। रत्नधाशब्दस्तु कृदुत्तरपदप्रकृतिस्वरेण समासस्वरेण वांतोदात्तः। तमप् तु पित्त्वादनुदात्तः। स्वरितप्रचयौ प्राग्वत्॥

वेदावतार आद्याया ऋचोऽर्थोऽस्तु प्रपंचितः।
औत्सर्गिकमितो ज्ञेयं विशेषस्तु प्रवक्ष्यते॥ १॥

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत॥
स देवाँ एह वक्षति॥ २॥

अग्निः। पूर्वेभिः। ऋषिऽभिः। ईड्यः। नूतनैः। उत॥
सः। देवान्। आ। इह। वक्षति॥ २॥

अग्निरिति। पूर्वेभिः पूर्वैः ऋषिभिः ऋषति जानंतीत्यृषयस्तैः। नूतनैरुत। इदानींतनैरपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


अग्निः ईड्यः स्तुत्यः सः अग्निः इह यज्ञे देवान् हविर्भुजः आवक्षति आवहतु ॥ पूर्वेभिः "स्वांगशिदामदंतानाम्" इत्याद्युदात्तः । "बहुलं छंदसी"ति भिस ऐसादेशाभावः । ऋषिभिः ऋषेर्गत्यर्थादौणादिक इन् "इगुपधात्किदि"ति इनः कित्त्वातिदेशाल्लघूपधगुणो न । ईड्यः ण्यत्प्रत्ययांतत्वात् । "तित्स्वरित"मिति स्वरिते शेषनिघाते च प्राप्ते । "ईडवंदवृशंसदुहां ण्यत" इत्याद्युदात्तत्वम् । नूतनैः । "नवस्य नप्तनप्खाश्च प्रत्ययाः" इति वार्तिकेन नू आदेशः तनप् प्रत्ययश्च । उतशब्दः स्वरादित्वादव्ययमंतोदात्तः फिट् स्वरात् । एवं स इत्यपि । देवानिति नकारस्य संहितायां "दीर्घादटी"ति रुत्वम् । "अत्रानुनासिक" इति आकारोऽनुनासिकः "भोभगोअघो–" इति रोर्यः "लोपः शाकल्यस्ये"ति तल्लोपः तस्यासिद्धत्वान्न संधिः । "व्यवहिताश्चे"ति सूत्रेणाङो व्यवहितप्रयोगः । इह । "इदमो हः" । वक्षति । "लिङर्थे लेट्" । "सिप् बहुलं लेटी"ति सिप् । "लेटोऽडाटावि"त्यट् ॥ २ ॥

अग्निना रयिमश्नवत्पोषमेव दिवेदिवे ॥
यशसं वीरवत्तमम् ॥ ३ ॥

अग्निना । रयिम् । अश्नवत् । पोषम् । एव । दिवेऽदिवे ॥
यशसम् । वीरवत्ऽतमम् ॥ ३ ॥

अग्निनेति । अग्निना । रयिं धनम् । अश्नवत् । प्राप्नोति । कीदृशम् । दिवेदिवे । पोषमेव । प्रतिदिनं पुष्यमाणम् । किं च । यशसं यशोयुक्तम् । वीरवत्तमम् । अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतम् । रयिशब्दो धननामसु पठितः । अश्नवत् । अश्नोतेर्लेट् । पदव्यत्ययेन तिप् । "इतश्च लोपः परस्मैपदेष्वि"ति इकारलोपः । पोषम् घञंतत्वादाद्युदात्तः । एव । "एवादीनामंत" इत्यंतोदात्तत्वम् । वकारांताद्विशब्दात् सप्तम्याः "सुपां सुलुगि"ति शेभावे "सावेकाच" इति "उडिदंपदादि"ति वा उदात्तत्वम् । "नित्यवीप्सयो"रिति द्वित्वम् । उत्तरभागस्य "अनुदात्तं चे"त्यनुदात्तत्वम् । यशसं । यशःशब्दस्य तद्वत्परता मंत्रांतरेऽपि दृष्टा । "अग्ने त्वं यशा असी"ति । वीरशब्दात्परस्य मतुपो "ह्रस्वनुड्भ्यां मतुप्" इति उदात्तत्वं प्राप्तं "न गोश्वन्ने"ति निषिध्यते ॥ ३ ॥

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ॥
स इद्देवेषु गच्छति ॥ ४ ॥

अग्ने । यम् । यज्ञम् । अध्वरम् । विश्वतः । परिऽभूः । असि ॥
सः । इत् । देवेषु । गच्छति ॥ ४ ॥

अग्ने यमिति । हे अग्ने । अध्वरं राक्षसादिकर्तृकहिंसारहितं यज्ञं विश्वतः सर्वासु दिक्षु परिभूः परितः प्राप्तवान् असि । स इत् स एव यज्ञो देवेषु गच्छति । अग्ने "आमंत्रितस्ये"ति षाष्ठ आद्युदात्तः । अध्वरं न विद्यते ध्वरो यस्येति बहुव्रीहौ "नञ्सुभ्याम्"त्यंतोदात्तत्वम् । तसिल् "लिती"ति प्रत्ययात्पूर्वं उदात्तः । परिभूः अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते तदपवादः कृदुत्तरपदप्रकृतिस्वरः । असि । यच्छब्दयोगान्न निघातः ॥ ४ ॥

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ॥
देवो देवेभिरा गमत् ॥ ५ ॥

अग्निः । होता । कविऽक्रतुः । सत्यः । चित्रश्रवःऽतमः ॥
देवः । देवेभिः । आ । गमत् ॥ ५ ॥

अग्निर्होतेति । होता । कविक्रतुः कविषु मेधाविषु क्रतुः कर्म यस्य । सत्सु साधुः सत्यः । चित्रश्रवस्तमः अतिशयेन विचित्रकीर्तियुक्तः । अग्निर्देवः । अन्यैर्देवैः सह आगमत् आगच्छतु । कविक्रतुः बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरः "कृञः कतु"रिति कतुप्रत्ययः । सत्यः "सत्यादशपथे" इति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



सूत्रे अनुदात्तो निपात्यत इति हरदत्तः। गमत्। "छंदसि लुङ्लङ्लिट" इति विभाषा। "बहुलं छंदस्यमाङ्योगे"पीति अडभावः ॥ ५ ॥

समाप्तः प्रथमो वर्गः ॥

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि ॥
तवेत्तत्सत्यमङ्गिरः ॥ १ ॥

यत्। अङ्ग। दाशुषे। त्वम्। अग्ने। भद्रम्। करिष्यसि ॥
तव। इत्। तत्। सत्यम्। अङ्गिरः ॥ १ ॥

यदिति। अंग हे अग्ने। त्वं दाशुषे। हविर्दत्तवते। यद्भद्रं करिष्यसि तत् तव इत् तवैव। अंगिरः एतन्नामकमहर्षे। तथा च मंत्रः। "त्वमग्ने प्रथमो अंगिरा ऋषि"रिति। इदं सत्यं उत्तरकृत्वनुष्ठानेनाग्नेरेव सुखपर्यवसानात् ॥ अंगशब्दस्य निपातत्वेऽपि "एवादीनामंत" इत्यंतोदात्तत्वम्। दाशुषे। दाशृ दाने। "दाश्वान् साह्वान्मीढ्वांश्चे"ति साधुः। अग्ने इत्यस्याष्टमिकनिघातो न भवति। अपादादाविति पर्युदस्तत्वात्। भद्रं भदि कल्याणे रक्प्रत्यये साधुः। तव। "युष्मदस्मदोर्ङसी"त्याद्युदात्तत्वम् ॥ १ ॥

उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् ॥
नमो भरन्त एमसि ॥ २ ॥

उप। त्वा। अग्ने। दिवेऽदिवे। दोषाऽवस्तः। धिया। वयम् ॥
नमः। भरन्तः। आ। इमसि ॥ २ ॥

उप त्वेति। हे अग्ने वयं दिवेदिवे। प्रतिदिनं दोषावस्तः रात्रावहनि च। धिया बुद्ध्या नमो नमस्कारं भरंतः कुर्वंतः त्वा इति त्वाम्। उप समीपे। एमसि एमः आगच्छामः। दोषाशब्दो रात्रिवाची। वस्तरित्यहर्वाची। द्वंद्वे कृते "कार्तकौजपादयश्चे"त्याद्युदात्तः। धिया "सावेकाचस्तृतीयादिर्विभक्ति"रिति उदात्तः। भरंतः शपः पित्त्वात् शतुर्लसार्वधातुकत्वाच्चानुदात्तत्वे सति धातुस्वरः शिष्यते। इमसि "इदंतो मसी"ति साधुः ॥ २ ॥

राजन्तमध्वराणां गोपामृतस्य दीदिविम् ॥
वर्धमानं स्वे दमे ॥ ३ ॥

राजन्तम्। अध्वराणाम्। गोपाम्। ऋतस्य। दीदिविम् ॥
वर्धमानम्। स्वे। दमे ॥ ३ ॥

राजंतमिति। त्वामुपेम इत्युक्तम्। कीदृशं त्वां। राजंतं दीप्यमानं अध्वराणां गोपाम् रक्षकम्। ऋतस्य अवश्यंभाविनः कर्मफलस्य दीदिविम् द्योतकम्। स्वे दमे स्वीयगृहे वर्धमानम्। क्विन् इत्यनुवर्तमाने "दिवो द्वे दीर्घश्चाभ्यासस्ये"ति दीव्यतेः औणादिकः क्विन् प्रत्ययः। वलि लोपः। दमशब्दो वृषादित्वादाद्युदात्तः ॥ ३ ॥

स नः पितेव सूनवेऽग्ने सूपायनो भव ॥
सचस्वा नः स्वस्तये ॥ ४ ॥

सः। नः। पिताऽइव। सूनवे। अग्ने। सुऽउपायनः। भव ॥
सचस्व। नः। स्वस्तये ॥ ४ ॥

स न इति। हे अग्ने स त्वं नः अस्मभ्यं सूनवे पुत्रार्थं पितेव सूपायनः शोभनप्राप्तियुक्तो भवः। किं च नः अस्माकं स्वस्तये क्षेमार्थं सचस्व समवेतो भव। पितेव "चादयोनुदात्ता" इतीव-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


शब्दोऽनुदात्तः "इवेन सह समासः पूर्वपदप्रकृतिस्वरत्वं च"। तेन पितेवेति मध्योदात्तम्। सचस्वेत्यत्र संहितायां "अन्येषामपि दृश्यत" इति दीर्घः ॥ ४ ॥

## द्वितीयो वर्गः ॥

वायवा याहि दर्शतेमे सोमा अरंकृताः ॥
तेषां पाहि श्रुधी हवम् ॥ १ ॥

वायो इति । आ । याहि । दर्शत । इमे । सोमाः । अरंऽकृताः ॥
तेषाम् । पाहि । श्रुधि । हवम् ॥ १ ॥

वायवायाहीति नवर्चं सूक्तम्। तत्राद्यस्तृचो वायुदेवताकः। द्वितीय इंद्रवायुदेवताकः। तृतीयो मित्रावरुणदेवताकः। ऋषिच्छंदसी प्राग्वत्। तथा चानुक्रांतं "वायो वायव्यैंद्रवायवमैत्रावरुणास्तृचा" इति। अत्राग्निं नवतो नवेत्यनुवर्तते ॥ वायविति। दर्शत दर्शनीय। हे वायो आयाहि। त्वदर्थम् इमे सोमा अरंकृताः अलंकृताः। अभिषवादिभिः संस्कृताः। तेषां पाहि तान् पिब। हवं आह्वानं श्रुधि शृणु। दर्शत "शृमृदृशीत्या"दिनाऽतच्। सोमाः "अर्तिस्तुस्वि"त्यादिना मन्। अरंकृताः "वालमूललघ्वलमंगुलीनां वा लो रमापद्यते" इत्याष्टमिकवार्तिकेन लस्य रेफादेशः तेषां कर्मणः शेषत्वविवक्षायां षष्ठी। पाहि "बहुलं छंदसी"ति शपो लुक् तेन पिबादेशो न। श्रुधि "श्रुशृण्वि"त्यादिना हेर्धिः। तिङंतात्परत्वान्निपातो न। "अन्येषामपी"ति संहितायां दीर्घः। हवं "बहुलं छंदसी"ति ह्वेञः संप्रसारणे "ऋदो"रित्यप् ॥ १ ॥

वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः ॥
सुतसोमा अहर्विदः ॥ २ ॥

वायो इति । उक्थेभिः । जरन्ते । त्वाम् । अच्छ । जरितारः ॥
सुतऽसोमाः । अहःऽविदः ॥ २ ॥

वायो जरितारः स्तोतारः त्वामच्छ अभिलक्ष्य उक्थेभिः आज्यप्रउगादिशस्त्रैर्जरंते स्तुवंति। कीदृशाः। सुतसोमाः सुतः सोमो यैस्ते। किंच अहर्विदः अहःशब्द एकेनाह्ना निष्पाद्ये ज्योतिष्टोमादिक्रतौ प्रसिद्धः तेन क्रत्वभिज्ञा इत्यर्थः। अर्चंति गायतीत्यादिषु जरते इति पठितं स्तुतेरपि अर्चनाविशेषत्वाज्जरत्यर्थता ॥ २ ॥

वायो तव प्रपृञ्चती धेना जिगाति दाशुषे ॥
उरूची सोमपीतये ॥ ३ ॥

वायो इति । तव । प्रऽपृञ्चती । धेना । जिगाति । दाशुषे ॥
उरूची । सोमऽपीतये ॥ ३ ॥

वायो तवेति। हे वायो तव धेना वाक्। सोमपीतये सोमपानार्थं दाशुषे यजमानाय जिगाति गच्छति। त्वया दत्तं सोमं पास्यामीति कृपया ब्रूत इत्यर्थः ॥ कीदृशी धेना। प्रपृंचती प्रकर्षेण पृंचती फलसंपर्कं कुर्वती। उरून् विचित्रान् मार्गानंचति गच्छतीति उरूची। प्रपृंचती "शतुरनुम" इति ङीबुदात्तः। श्लोकोधारेत्यादिवाङ्नामसु धेनेति पठितं वर्तते। अयत इत्यादि गतिकर्मसु जिगातीति पठितं। उरूची गौरादित्वान्ङीष् प्रत्ययस्वरः। सोमपीतये व्यत्ययेन पूर्वपदप्रकृतिस्वरः ॥ ३ ॥

इन्द्रवायू इमे सुता उप प्रयोभिरा गतम् ॥
इन्दवो वामुशन्ति हि ॥ ४ ॥

इन्द्रवायू इति । इमे । सुताः । उप । प्रयःऽभिः । आ । गतम् ॥
इन्दवः । वाम् । उशन्ति । हि ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



इंद्रवायू इति । हे इंद्रवायू । इमे सोमाः सुता अभिषुताः तस्माद्युवां प्रयोभिरन्नैः सह उपागतं आगच्छतं हि यस्मादिंदवः सोमाः वां युवां उशंति कामयंते । प्रीणयंति भोक्तृनिति प्रयांसि । प्रीङोंऽतर्भावितण्यर्थादसुन् । गतं "बहुलं छंदसी"ति शपो लुक् । उंदी क्लेदने "उंदेरिच्चादे"रित्युन् आद्यक्षरस्येकारादेशश्च । उशंति "हि चे"ति निघातप्रतिषेधः ॥ ४ ॥

वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू ॥
तावा यातमुप द्रवत् ॥ ५ ॥

वायो इति । इन्द्रः । च । चेतथः । सुतानाम् । वाजिनीवसू इति वाजिनीऽवसू ॥
तौ । आ । यातम् । उप । द्रवत् ॥ ५ ॥

वायविंद्र इति । हे वायो त्वं इंद्रश्च सुतानां सोमानां चेतथः जानीथः । कीदृशौ । वाजोऽन्नं तदस्यामस्तीति वाजिनी हविःसंततिः तस्यां वसतः इति वाजिनीवसू । तौ युवां द्रवत् क्षिप्रं उपायातम् । क्षिप्रनामसु द्रवदिति पाठात् "ऋन्नेंद्रे"त्यादिना इंद्रशब्दो रन्प्रत्ययांतो निपातितः ॥ ५ ॥

तृतीयो वर्गः ॥

वायविन्द्रश्च सुन्वत आ यातमुप निष्कृतम् ॥
मक्ष्वित्था धिया नरा ॥ १ ॥

वायो इति । इन्द्रः । च । सुन्वतः । आ । यातम् । उप । निःऽकृतम् ॥
मक्षु । इत्था । धिया । नरा ॥ १ ॥

वायविति । हे वायो त्वमिंद्रश्च सुन्वतः सोमाभिषवं कुर्वतः निष्कृतं संस्कर्तारं सोमं धिया अनुग्रहबुद्ध्या मक्षु शीघ्रं उपायातं आगच्छतं । नरा हे नरौ पौरुषोपेतौ इत्था अवश्यम् । सुन्वतः "शतुरनुमोनद्यजादी"ति विभक्तेरुदात्तत्वम् । निष्कृतम् निरित्येष समित्येतस्य स्थाने इति यास्कः आदिकर्मणि क्तः कर्तरि चेति कर्तरि क्तः संस्कर्तुं प्रवृत्तमित्यर्थात् कुगतीति समासेऽव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते "थाथघञ्क्ताजबित्रकाणामि"त्यंतोदात्तः । "गतिरनंतर" इति तु नेह भवति । कर्मणि क्तांते उत्तरपद एव तत्प्रवृत्तेः । मक्ष्वित्येति संहितायां "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्ये"ति इकारः स्वरितः तस्य पूर्वभाग उदात्ततरः शेषोऽनुदात्तः । तथा च प्रातिशाख्यम् । "एकाक्षरसमादेशे पूर्वयोः स्वरितः स्वरः । तस्योदात्ततरोदात्तादर्धमात्रार्धमेव वा ॥ अनुदात्तः परःशेष" इति । न चैवमग्निमीळे इत्यत्रापि ईकारशेषस्यानुदात्ततापत्तिः "स उदात्तश्रुतिर्न चेत् । उदात्तं वोच्यते किंचित्स्वरितं वाक्षरं पर"मित्युत्तरवाक्ये नोदात्तस्वरितपरत्वाभावे स्वरितशेषस्योदात्तश्रुत्यभिधानात् । धिया "सावेकाच" इति विभक्तिरुदात्ता ॥१॥

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् ॥
धियं घृताचीं साधंता ॥ २ ॥

मित्रम् । हुवे । पूतऽदक्षम् । वरुणम् । च । रिशादसम् ॥
धियम् । घृताचीम् । साधन्ता ॥ २ ॥

मित्रमिति । पूतदक्षं पवित्रबलं मित्रं रिशादसम् रिशानां हिंसकानां अदसम् अत्तारम् । वरुणं च हुवे आह्वयामि । कीदृशौ । घृताचीं घृतमुदकमंचति प्रापयति इति घृताची तां धियम् क्रियां साधंता साधयंतौ । वृष्टिप्रदाविति यावत् । हुवे । ह्वयते "बहुलं छंदसी"ति शपो लुकि ह्वः संप्रसारणमित्यनुवृत्तौ बहुलं छंदसीति संप्रसारणे उवङ् । वरुणम् "कृवृदारिभ्य उनन्" । रिशंति हिंसंतीति रिशाः । "इगुपधज्ञाप्रीकिरः कः" । अत्तेरसुन् कृदुत्तरप्रकृतिस्वरत्वम् । धीशब्दः कर्मनामसु पठितः । घृताचीम् । कृदुत्तरपदप्रकृतिस्वरेणांचतेरकार उदात्तः तस्य लोपे सति "अनुदात्तस्य च यत्रोदात्तलोपः" इति ङीप उदात्तत्वे प्राप्ते "चावि"ति पूर्वपदांतोदात्तत्वम् । साधंता । अंतर्भावितण्यर्थाल्लटः शत्रादेशे श्यनं (श्नुं) बाधित्वा व्यत्ययेन शप् । अदुपदेशात्परत्वात् शतुर्निघातः ॥ २ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



ऋतेन मित्रावरुणावृतावृधावृतस्पृशा ॥
ऋतुं बृहन्तमाशाथे ॥ ३ ॥

ऋतेन । मित्रावरुणौ । ऋतऽवृधौ । ऋतऽस्पृशा ॥
ऋतुम् । बृहन्तम् । आशाथे इति ॥ ३ ॥

ऋतेनेति । हे मित्रावरुणौ युवां ऋतेन ऋतेन अवश्यं भाविना फलेन फलं दातुमिति यावत् । बृहंतं ऋतुं आशाथे आनशाथे व्याप्तवंतौ । कीदृशौ । ऋतावृधौ । ऋतस्य उदकादेः ऋतमित्युदकनाम सत्यं वा यज्ञो वेति यास्कोक्तेः । वृधौ वर्धयितारौ । ऋतस्पृशा । ऋतं सत्यं स्पृशंतौ । ऋतशब्दो घृतादित्वादंतोदात्तः । ऋतावृधौ "अन्येषामपी"ति दीर्घः । इहामंत्रितत्रिकस्यापि आष्टमिको निघातः ऋतेनेत्यस्य परांगवद्भावस्तु न असामर्थ्यात् । "समर्थः पदविधि"रिति परिभाषया हि सत्येव परस्परान्वये परांगवद्भावः । यथा "यत्ते दिवो दुहितरि"त्यादौ । ननु ऋतावृधावित्यस्य पादादित्वान्निघातो न स्यात् । यथा "इमं मे गंगे" इति मंत्रे शुतुद्रिपदस्येति चेन्न । मित्रावरुणावित्यस्य परांगवद्भावे सति विशिष्टस्यामंत्रिततया पादादित्वाभावात् शुतुद्रिपदात्प्राचीनस्य तु असामर्थ्येन परांगवद्भावो नेति वैषम्यम् । आशाथे । नुडभावः छांदसः ॥ ३ ॥

कवी नो मित्रावरुणा तुविजाता उरुक्षया ॥
दक्षं दधाते अपसम् ॥ ४ ॥

कवी इति । नः । मित्रावरुणा । तुविऽजातौ । उरुऽक्षया ॥
दक्षम् । दधातेऽइति । अपसम् ॥ ४ ॥

कवी इति । कवी मेधाविनौ तुविजातौ बहूनामुपकाराय जातौ । उरुक्षया बहुनिवासौ । मित्रावरुणौ नः अस्माकं दक्षं बलं अपसं कर्म च दधाते पोषयतः । तुवि अपसं(?)इत्याद्या उक्तार्थकतया निघंटौ प्रसिद्धाः ॥ मित्रावरुणा "देवताद्वंद्वे चे"ति पदद्वये प्रकृतिस्वरः । उरुक्षया । "परादिश्छंदसि बहुल"मित्युत्तरपदाद्युदात्तत्वम् । दक्षम् । दक्षतेरुत्साहकर्मणो घञ् । अपसम् । आप्यते फलेनेत्यपः कर्म । "आपः कर्माख्यायां हस्वो नुट् च वे"त्यसुन् । प्रत्ययस्याद्युदात्तत्वं बाहुलकात् ॥ ४ ॥

## चतुर्थो वर्गः ॥

अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती ॥
पुरुभुजा चनस्यतम् ॥ १ ॥

अश्विना । यज्वरीः । इषः । द्रवत्पाणी इति द्रवत्ऽपाणी । शुभः । पती इति ॥
पुरुऽभुजा । चनस्यतम् ॥ १ ॥

अश्विनेत्यादि द्वादशार्चं सूक्तम् तत्राद्यस्तृच आश्विनः द्वितीय ऐंद्रः तृतीयो वैश्वदेवः चतुर्थः सारस्वतः । वायवायाहीत्यादिषु सप्तसु तृचेषु उक्ताः सप्त प्रउगशस्त्रस्य देवताः । तथा चानुक्रांतम् । "अश्विना द्वादशाश्विनैंद्रवैश्वदेवसारस्वतास्तृचाः सप्तैताः प्रउगदेवताः" इति । अश्विनेति । द्रवत्पाणी द्रवंतौ हविर्ग्रहणार्थं धावंतौ पाणी ययोः । शुभस्पती शुभः शोभनस्य कर्मणः । शुभ दीप्तौ क्विप् षष्ठ्येकवचनम् । "षष्ठ्याः पतिपुत्रे"ति विसर्जनीयस्य सत्वम् । पती पालकौ । पुरुभुजा महाभुजौ । हे अश्विना अश्विनौ । यज्वरीः यागनिष्पादिकाः । करणस्य कर्तृत्वविवक्षायां "सुयजोर्ङ्वनिप्" "वनो र चे"ति ङीब्रौ । इषः अन्नानि चनस्यतं इच्छतम् ॥ शुभ इत्यस्य परांगवद्भावे सत्यामंत्रिताद्युदात्तत्वं न त्वाष्टमिको निघातः । "आमंत्रितं पूर्वमविद्यमानवदि"त्यनेन द्रवत्पाणी इत्यस्यासत्कल्पत्वेन पादादित्वात् । चनस्यतम् । "चायेरन्ने हस्वश्चे"ति असुन् चानुट् लोपो व्योरिति यलोपः चनस्शब्दात् "सुप आत्मनः क्यच्" । पूर्वस्याविद्यमानवद्भावात्तिङंतस्य न निघातः ॥ १ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



अश्विना पुरुदंससा नरा शवीरया धिया ॥
धिष्ण्या वनतं गिरः ॥ २ ॥

अश्विना । पुरुऽदंससा । नरा । शवीरया । धिया ॥
धिष्ण्या । वनतम् । गिरः ॥ २ ॥

अश्विनेति । पुरुदंससा बहुकर्माणौ दंससशब्दस्य कर्मनामसु पाठात् । नरा पौरुषोपेतौ । धिष्ण्या धार्ष्ट्योपेतौ । हे अश्विना अश्विनौ । शवीरया अप्रतिबद्धप्रसरया । शु गतौ औणादिक ईरन् । धिया । गिरः स्तुतीः । वनतं स्वीकुरुतम् ॥ अश्विनेत्यस्य "नामंत्रिते समानाधिकरणे" इति अविद्यमान(व)त्वनिषेधः प्राप्तः बाहुलकान्न भवति ॥ २ ॥

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः ॥
आ यातं रुद्रवर्तनी ॥ ३ ॥

दस्रा । युवाकवः । सुताः । नासत्या । वृक्तऽबर्हिषः ॥
आ । यातम् । रुद्रवर्तनी इति रुद्रऽवर्तनी ॥ ३ ॥

दस्रेति । दस्रा दस्यत इति दस्रा "स्फायितंची"ति रक् शत्रूणां रोगाणां च नाशकौ । नासत्या असत्यरहितौ । "नभ्राण्नपादि"त्यादिना नञो नलोपाभावः । रुद्रवर्तनी रुद्रस्येव वर्तनिः मार्गो ययोस्तौ । हे अश्विनौ युवंति मिश्रीभवंति वसतीवरीभिरिति युवाकवः बाहुलकाद्यौतेः काकुप्रत्ययः । वृक्तबर्हिषः वृक्तं मूलैर्वर्जितं बर्हिरास्तीर्णं येषां ते सुताः तदर्थमायातम् ॥ ३ ॥

इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ॥
अण्वीभिस्तना पूतासः ॥ ४ ॥

इन्द्र । आ । याहि । चित्रभानो इति चित्रऽभानो । सुताः । इमे । त्वाऽयवः ॥
अण्वीभिः । तना । पूतासः ॥ ४ ॥

इंद्रेति । चित्रभानो चित्रदीप्ते । हे इंद्र आयाहि । यतः अण्वीभिः अंगुलिभिः सुताः तना नित्यं पूतासः शुद्धा इमे सोमाः त्वायवः त्वां कामयमानाः संति । त्वायवः त्वामिच्छंतीत्यर्थे "सुप आत्मनः क्यच्" "क्याच् छंदसी"ति उप्रत्ययः "प्रत्ययोत्तरपदयोश्चे"ति मपर्यंतस्य त्वादेशः अविभक्तावपि व्यत्ययेनात्वम् । अण्वीभिः अणुशब्दात् व्यत्ययेन ङीन् अयमंगुलिनामसु पठितः ॥ ४ ॥

इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ॥
उप ब्रह्माणि वाघतः ॥ ५ ॥

इन्द्र । आ । याहि । धिया । इषितः । विप्रऽजूतः । सुतऽवतः ॥
उप । ब्रह्माणि । वाघतः ॥ ५ ॥

इंद्रेति । इंद्र धिया असमन्क्या इषितः प्रेरितः विप्रजूतः ऋत्विग्भिर्ध्यातः जू (जु?) गतौ सौत्रः "श्रुकः किती"ति नेट् "तृतीया कर्मणी"ति पूर्वपदप्रकृतिस्वरः एवंभूतस्त्वं सुतावतः अभिषुतसोमयुक्तस्य वाघतः ऋत्विजः ऋत्विङ्नामसु पाठात् । ब्रह्माणि स्तोत्राणि उपैतुमायाहि ॥ ५ ॥

इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ॥
सुते दधिष्व नश्चनः ॥ ६ ॥

इन्द्र । आ । याहि । तूतुजानः । उप । ब्रह्माणि । हरिऽवः ॥
सुते । दधिष्व । नः । चनः ॥ ६ ॥

इंद्रेति । हरी इंद्रस्याश्वौ । "हरी इंद्रस्य रोहितोऽग्ने"रिति पाठात् । हे हरिवः अश्वविशेषवन् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



"छंदसीरः" इति मतुपो मस्य वत्वम् "मतुबसोरुसंबुद्धौ छंदसी"ति रुत्वम्। इंद्र। तूतुजानः त्वरमाणः शत्रून् हिंसन्वा। तुज हिंसायां "तुजादीनां दीर्घोभ्यासस्ये"ति दीर्घः। ब्रह्माणि (स्तोत्राणि) उपैतुं स्वीकर्तुं उप समीपं आयाहि। सोमे सुते सति नः चनोऽन्नं हविः दधिष्व स्वीकुरु। "छंदस्युभयथे"त्यार्धधातुकत्वादिट् ॥ ६ ॥

पंचमो वर्गः ॥

ओमासश्चर्षणीधृतो विश्वे देवास आ गत ॥
दाश्वांसो दाशुषः सुतम् ॥ १ ॥

ओमासः। चर्षणिऽधृतः। विश्वे। देवासः। आ। गत ॥
दाश्वांसः। दाशुषः। सुतम् ॥ १ ॥

ओमास इति। अवंतीति ओमासः रक्षकाः मन्नित्यनुवृत्तौ "अविसिविसिशुषिभ्यः किदि"ति मन्। "ज्वरत्वरे"त्यूठ्। मनः कित्त्वेपि बाहुलकाद्गुणः। चर्षणयो मनुष्याः तान् धरंति पोषयंतीति चर्षणीधृतः ॥ दाश्वांसः दातारः ॥ हे विश्वे देवासः दाशुषः यजमानस्य सुतं सोमं प्रति आगत आगच्छत ॥ १ ॥

विश्वे देवासो अस्तुरः सुतमा गन्त तूर्णयः ॥
उस्रा इव स्वसराणि ॥ २ ॥

विश्वे। देवासः। अप्ऽतुरः। सुतम्। आ। गन्त। तूर्णयः ॥
उस्राःऽइव। स्वसराणि ॥ २ ॥

विश्वे इति। अस्तुरः तुरत्वरणे श्लुविकरणः तुतुरति त्वरयंतीत्यर्थे क्विप्। वृष्टिप्रदाः। त्वरंते इति तूर्णयः निरित्यनुवृत्तौ "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्" । विश्वे देवासः सुतमागंत आगच्छंतु व्यत्ययेन मध्यमपुरुषबहुवचनम् "तप्तनप्तनथनाश्चे"ति तबादेशे ङित्वाभावादनुनासिकलोपो न। उस्राः सूर्यरश्मयः। स्वसराणि अहानि इव यथा शीघ्रमायांति तद्वत् ॥ २ ॥

विश्वे देवासो अस्त्रिध एहिमायासो अद्रुहः ॥
मेधं जुषन्त वह्नयः ॥ ३ ॥

विश्वे। देवासः। अस्त्रिधः। एहिऽमायासः। अद्रुहः ॥
मेधम्। जुषन्त। वह्नयः ॥ ३ ॥

विश्वे इति। अस्त्रिधः क्षयरहिताः स्त्रिधेः क्षयार्थाद्भावे क्विप् नञा बहुव्रीहिः "नञ्सुभ्याम्"-मंतोदात्तत्वम्। एहिमायासः आ समंतादीहते इत्येहिः "इन्" इति इन्। सर्वतो व्याप्ता माया येषां ते। अद्रुहः द्रोहरहिताः वह्नयः वोढारः "वहिश्री"त्यादिना निर्नित्। विश्वे देवासः मेध्यते देवैः संगम्यते इति मेधं हविः। मेध संगमने च कर्मणि घञ्। जुषंत सेवंताम् ॥ ३ ॥

पावका नः सरस्वती वाजेभिर्वाजिनीवती ॥
यज्ञं वष्टु धियावसुः ॥ ४ ॥

पावका। नः। सरस्वती। वाजेभिः। वाजिनीऽवती ॥
यज्ञम्। वष्टु। धियाऽवसुः ॥ ४ ॥

पावकेति। पुनातीति पावका शोधयित्री। "प्रत्ययस्थात्कादि"तीत्वाभावः अंतोदात्तत्वं च



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



छांदसम्। वाजिनीवती अन्नवती या क्रिया तद्वती। धिया कर्मणा वसु यस्याः सकाशात् सा धियावसुः तृतीयाया अलुक् छांदसः। सरस्वती वाजेभिरन्नैः वृषादित्वादाद्युदात्तः। नः यज्ञं वष्टु कामयताम् ॥ ४ ॥

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ॥
यज्ञं दधे सरस्वती ॥ ५ ॥

चोदयित्री। सूनृतानाम्। चेतन्ती। सुऽमतीनाम् ॥
यज्ञम्। दधे। सरस्वती ॥ ५ ॥

चोदयित्रीति। सूनृतानां प्रियसत्यवाक्यानां चोदयित्री प्रेरयित्री। "उदात्तयणो हल्पूर्वादि"ति ङीबुदात्तः। सुमतीनां अनुष्ठातॄणाम्। "नामन्यतरस्या"मिति विभक्तेरुदात्तत्वम्। चेतंती अनुष्ठेयं ज्ञापयंती सरस्वती यज्ञं दधे धारितवती ॥ ५ ॥

महो अर्णः सरस्वती प्र चेतयति केतुना ॥
धियो विश्वा वि राजति ॥ ६ ॥

महः। अर्णः। सरस्वती। प्र। चेतयति। केतुना ॥
धियः। विश्वाः। वि। राजति ॥ ६ ॥

मह इति। सरस्वती केतुना कर्मणा महो अर्णः महदुदकम्। प्रचेतयति ज्ञापयति। नदीरूपेणाप्यवस्थानात् वृष्टिप्रदत्वाद्वा। विश्वाः धियः सर्वाणि ज्ञानानि। विराजति प्रकाशयति। महो अर्णः महच्छब्दतकारस्य व्यत्ययेन सः ॥ ६ ॥

षष्ठो वर्गः ॥

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ॥
जुहूमसि द्यविद्यवि ॥ १ ॥

सुरूपऽकृत्नुम्। ऊतये। सुदुघाम्ऽइव। गोऽदुहे ॥
जुहूमसि। द्यविऽद्यवि ॥ १ ॥

सुरूपेत्यादि दशर्चं सूक्तम्। "सुरूपकृत्नुं दशे"त्यनुक्रांतत्वात्। इंद्रो देवता इंद्रं पृच्छेत्यादिलिंगात्। सुरूपकृत्नुं सुरूपस्य शोभनरूपोपेतस्य कर्मणः कृत्नुं कर्त्तारम्। "कृहनिभ्यां क्नुः" तकारः छांदसः। इंद्रं ऊतये रक्षार्थं उदात्त इत्यनुवृत्तौ "ऊतियूतिजूतिसातिहेतिकीर्तयश्चे"ति क्तिन्नुदात्तो निपातितः। द्यविद्यवि। प्रतिदिनम्। जुहूमसि आह्वयामः। गोदुहे गोदोहनार्थम् सुदुघां दोग्ध्रीं गां इव ॥ १ ॥

उप नः सवना गहि सोमस्य सोमपाः पिब ॥
गोदा इद्रेवतो मदः ॥ २ ॥

उप। नः। सवना। आ। गहि। सोमस्य। सोमऽपाः। पिब ॥
गोऽदाः। इत्। रेवतः। मदः ॥ २ ॥

उपेति। हे सोमपाः इंद्र नः सवना सवनानि उप आगहि उपागच्छ। सोमस्य सोमं पिब। रयिर्धनम् तद्वान् रेवान्। "रयेर्मतौ बहुलं छंदसी"ति संप्रसारणम्। रेवतस्त्व। मदो हर्षः "मदोऽनुपसर्गे" इत्यप्। गोदा इत् गोमद एव ॥ २ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


अथा ते अन्तमानां विद्याम सुमतीनाम् ॥
मा नो अति ख्य आ गहि ॥ ३ ॥

अथ । ते । अन्तमानाम् । विद्याम । सुऽमतीनाम् ॥
मा । नः । अति । ख्यः । आ । गहि ॥ ३ ॥

अथेति । सोमपानानंतरं ते तव अंतमानां अतिशयेन समीपवर्तिनां अंतिकशब्दांतमपि । "तमे तादेःकादेश्चे"ति तादिलोपः । सुमतीनां शोभनमतीनां संबंधसामान्ये षष्ठी । विद्याम जानीयाम । नः अस्मान् अति अतिक्रम्य मा ख्यः अन्येभ्यस्त्वत्स्वरूपं मा प्रकथय ॥ ३ ॥

परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम् ॥
यस्ते सखिभ्य आ वरम् ॥ ४ ॥

परा । इहि । विग्रम् । अस्तृतम् । इन्द्रम् । पृच्छ । विपःऽचितम् ॥
यः । ते । सखिऽभ्यः । आ । वरम् ॥ ४ ॥

परेति । यजमानं प्रति होता ब्रूते । त्वं । विग्रं मेधाविनं तन्नामसु पाठात् । वृषादित्वादाद्युदात्तः अस्तृतं अहिंसितं अव्ययपूर्वपदप्रकृतिस्वरः एतादृशमिंद्रं परेहि तत्समीपं गच्छ । गत्वा च होतारं मां विपश्चितं शास्त्राभिज्ञं पृच्छ । सम्यक् स्तुतवान्न वेति पृच्छेति भावः । यः इंद्रस्ते तव सखिभ्यः "समाने ख्यः स चोदात्त" इति ख्यातेरिण् । यलोपो ङिच्चेत्यनुवृत्तेराकारयकारलोपौ समानस्य सादेश उदात्तः वरं इष्टं आ समंतात् यच्छतीति शेषः ॥ ४ ॥

उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत ॥
दधाना इन्द्र इद्दुवः ॥ ५ ॥

उत । ब्रुवन्तु । नः । निदः । निः । अन्यतः । चित् । आरत ॥
दधानाः । इन्द्रं । इत् । दुवः ॥ ५ ॥

उतेति । इंद्र इत् इंद्रविषय एव दुवः परिचर्यां दधानाः कुर्वाणाः शानचः चित्वात्प्राप्तमंतोदात्तत्वं बाधित्वा परत्वात् "अभ्यस्तानामादिरि"त्याद्युदात्तत्वम् नः अस्माकं ऋत्विजः ब्रुवंतु इंद्रं स्तुवंतु । उत अपि च हे निदो निंदितारः णिदि कुत्सायाम् क्विप् नुमभावच्छांदसः आमंत्रितत्वेपि स्वैकवाक्यतापन्नपदात् परत्वाभावात् न निघातः । निरारत इतो निर्गच्छथ । अन्यतश्चित् अन्यस्मादपि देशान्निर्गच्छत । आरत "सर्तिशास्त्री"त्यङ् ॥ ५ ॥

सप्तमो वर्गः ॥

उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः ॥
स्यामेदिन्द्रस्य शर्मणि ॥ १ ॥

उत । नः । सुऽभगान् । अरिः । वोचेयुः । दस्म । कृष्टयः ॥
स्याम । इत् । इन्द्रस्य । शर्मणि ॥ १ ॥

उत न इति । हे दस्म शत्रूणामुपक्षपयितर् इंद्र । दसु उपक्षये अस्मादंतर्भावितण्यर्थात् "इषियुधीन्धिदसिश्यधूसूभ्यो मक्" इति मक् । अरिः कृष्टय उत मित्रभूता मनुष्याश्च नः अस्मान् सुभगान् "नञ्सुभ्यामि"त्युत्तरपदोदात्तत्वं बाधित्वा "कृत्वादयश्चे"त्युत्तरपदाद्युदात्तत्वम् । वोचेयुः उच्यासुः "लिङ्याशिष्यङ्" इत्यङ् "वच उम्" इत्युमागमः "छंदस्युभयथे"ति लिङादेशस्य सार्व-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


धातुकत्वात् "लिङः सलोपोनंत्यस्ये"ति सलोपः। किंच इंद्रस्य शर्मणि सुखे स्यामेत् भवेमैव तमेव तोषयेमेत्यर्थः ॥ १ ॥

एमाशुमाशवे भर यज्ञश्रियं नृमादनम् ॥
पतयन्मन्दयत्सखम् ॥ २ ॥

आ। ईम्। आशुम्। आशवे। भर। यज्ञऽश्रियम्। नृऽमादनम् ॥
पतयत्। मन्दयत्ऽसखम् ॥ २ ॥

एमाशुमिति। अश्नुते आप्नोति यागानित्याशुः तथाभूतायेंद्राय। "कृवापाजिमिस्वदिसाध्यशूभ्य उणि"त्युण्। ईमिति निपात इदमर्थे ईं इमं सोमं आभर आहर "हृग्रहोर्भश्छंदसी"ति भः। कीदृशं सोमम् आशुम् सवनत्रयव्याप्तम्। यज्ञश्रियम् यज्ञसंपद्रूपम्। नृमादनम् ऋत्विजां हर्षहेतुम्। माद्यन्तेऽनेनेति करणे ल्युट् लित्स्वरः। पतयत् पतयंतम् कर्मणि प्राप्नुवंतं पतेरदंतस्य चुरादित्वाण्णिच् "छंदस्युभयथे"ति शतुरार्धधातुकत्वेन शबभावात् "अदुपदेशादि"ति निघातो न। णिलोपाभावश्छांदसः। (मन्दयत्सखं) मंदयति हर्षयतीति मंदयन् इंद्रः तस्मिन्सखायं "तत्पुरुषे तुल्यार्थे"ति सप्तमीपूर्वप्रकृतिस्वरत्वम् ॥ २ ॥

अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः ॥
प्रावो वाजेषु वाजिनम् ॥ ३ ॥

अस्य। पीत्वा। शतक्रतो इति शतऽक्रतो। घनः। वृत्राणाम्। अभवः ॥
प्र। आवः। वाजेषु। वाजिनम् ॥ ३ ॥

अस्येति। हे शतक्रतो अस्य सोमस्य पीत्वा वृत्राणां वृत्रदैत्यानां घनो अभवः दुःसहो भूः "भूतौ घन" इति हंतेः काठिन्येऽप् ततो अर्शआद्यच् वित्त्वादंतोदात्तः। किं च वाजेषु संग्रामेषु वाजिनम् हविर्दातारम् प्रावः प्रकर्षेणारक्षः ॥ ३ ॥

तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो ॥
धनानामिन्द्र सातये ॥ ४ ॥

तम्। त्वा। वाजेषु। वाजिनम्। वाजयामः। शतक्रतो इति शतऽक्रतो ॥
धनानाम्। इन्द्र। सातये ॥ ४ ॥

तं त्वेति। हे शतक्रतो इंद्र धनानां सातये संभजनार्थं षणु(ण) संभक्तौ "ऊतियूती"त्यादिना क्तिबुदात्तः वाजेषु युद्धेषु वाजिनं बलवंतं तं त्वा त्वां वाजयामः अन्नवंतं कुर्म ॥ ४ ॥

यो रायोऽवनिर्महान्त्सुपारः सुन्वतः सखा ॥
तस्मा इन्द्राय गायत ॥ ५ ॥

यः। रायः। अवनिः। महान्। सुऽपारः। सुन्वतः। सखा ॥
तस्मै। इन्द्राय। गायत ॥ ५ ॥

य इति। य इंद्र रायो धनस्य "उदिदंपदाद्यप्पुंरैद्युभ्य" इति विभक्तेरुदात्तत्वम्। संहितायां तु "स्वरितो वानुदात्ते पदादावि"ति स्वरितः। अवनिः रक्षकः। "अर्तिसृधृधम्यशिवृभ्योऽनिः"-अनिप्रत्ययः। महान् तथा सुपारः सुष्ठु कर्मणः प्रापयिता। सुन्वतः यजमानस्य सखा। तस्मै इंद्राय गायत स्तुतिं कुरुत ॥ ५ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


## अष्टमो वर्गः ॥

ॐ

आ त्वेता नि षीदतेन्द्रमभि प्र गायत ॥
सखायः स्तोमवाहसः ॥ १ ॥

आ । तु । आ । इत । नि । सीदत । इन्द्रम् । अभि । प्र । गायत ॥
सखायः । स्तोमऽवाहसः ॥ १ ॥

आत्विति । दशर्चं सूक्तम् । "सुरूपकृत्नुं दशे"त्यनुवृत्तौ "आतु युंजंती"त्यनुक्रांतत्वात् । ऋष्यादि प्राग्वत् । तुशब्दः क्षिप्रार्थः द्वाभ्यामाङ्भ्यामन्वेतुं इतेत्यावर्तते । त्रिवृत्पंचदशादीन् स्तोमान् वहंति प्रापयंति ते स्तोमवाहसः "अर्तिस्तुसु" इत्यादिना स्तौतेर्मन् "वहिहाधाञ्भ्यश्छंदसी"ति वहेरसुन् तत्र णिदित्यनुवृत्तेरुपधावृद्धिः । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते "गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं वे"त्यौणादिकसूत्रात्समास आद्युदात्तः । तथाभूता ये सखाय ऋत्विजस्ते तु क्षिप्रं ( आ इत ) आगच्छत निषीदत उपविशत । इंद्रं ( अभि ) सर्वतः ( प्रगायत ) प्रकर्षेण स्तुतः ॥ १ ॥

पुरूतमं पुरूणामीशानं वार्याणाम् ॥
इन्द्रं सोमे सचा सुते ॥ २ ॥

पुरुऽतमम् । पुरूणाम् । ईशानम् । वार्याणाम् ॥
इन्द्रम् । सोमे । सचा । सुते ॥ २ ॥

पुरूतममिति । सोमे सुते सति सचा सह इंद्रं अभि प्रगायतेत्यनुषज्यते । कीदृशम् पुरून् बहून् शत्रून् तमयति ग्लपयति इति पुरूतमः तं । तमु ग्लानौ ण्यंतात्कर्मण्यण् । कृदुत्तरपदप्रकृतिस्वरं बाधित्वा "परादि छंदसि बहुल"मित्युत्तरपदाद्युदात्तत्वम् । किं च पुरूणां बहूनां वार्याणां वरणीयानां धनानां ईशानम् ॥ २ ॥

स घा नो योग आ भुवत्स राये स पुरंध्याम् ॥
गमद्वाजेभिरा स नः ॥ ३ ॥

सः । घ । नः । योगे । आ । भुवत् । सः । राये । सः । पुरम्ऽध्याम् ॥
गमत् । वाजेभिः । आ । सः । नः ॥ ३ ॥

स घेति । घेत्यवधारणार्थो निपातः । स एवेंद्रः नः योगे अप्राप्तपुरुषार्थप्राप्तौ आ भुवत् भवतु । स एव राये धनार्थं च भवतु । स एव पुरंध्यां पुरं शरीरं धीयतेऽस्यामिति "कर्मण्यधिकरणे चेति" किः अलुक् छांदसः । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् । स एव वाजेभिरन्नैः सह नोऽस्मान् आगमत् आगच्छतु ॥ ३ ॥

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः ॥
तस्मा इन्द्राय गायत ॥ ४ ॥

यस्य । सम्ऽस्थे । न । वृण्वते । हरी इति । समत्ऽसु । शत्रवः ॥
तस्मै । इन्द्राय । गायत ॥ ४ ॥

यस्येति । समत्सु युद्धेषु यस्य संस्थे रथे युक्तौ हरी शत्रवो न वृण्वते न सहंते । शत्रव इति शातयतेरौणादिकः कुन् । प्रज्ञादौ शत्रुरिति पाठात् ह्रस्वः । तस्मा इत्यादि प्राग्वत् ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


सुतपाव्ने सुता इमे शुचयो यन्ति वीतये ॥
सोमासो दध्याशिरः ॥ ५ ॥

सुतऽपाव्ने । सुताः । इमे । शुचयः । यन्ति । वीतये ॥
सोमासः । दधिऽआशिरः ॥ ५ ॥

सुतपाव्न इति । सुताः अभिषुताः । शुचयः शुद्धाः दधाति पुष्णातीति दधि "आदृगमहनजनः किकिनौ लिट्च"ति किन् । आ समंतात् शृणाति हिनस्ति दोषानिति आशीः संस्कारकं येषां ते दध्याशिरः इमे सोमाः सुतपाव्ने सोमपानकर्त्रे पिबतेर्वनिप् । वीतये भक्षणार्थम् । वी गतिप्रजनकांत्यशनखादनेषु अस्मात् "मंत्रे वृषेषपचमनभूवीरा उदात्त" इति क्तिन्नुदात्तः । यंति प्राप्नुवंति ॥ ५ ॥

नवमो वर्गः ॥

त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः ॥
इन्द्र ज्यैष्ठ्याय सुक्रतो ॥ १ ॥

त्वम् । सुतस्य । पीतये । सद्यः । वृद्धः । अजायथाः ॥
इन्द्र । ज्यैष्ठ्याय । सुक्रतो इति सुऽक्रतो ॥ १ ॥

त्वमिति । हे सुक्रतो इंद्र त्वं सुतस्य सोमस्य पीतये पानाय "स्थागापापचो भावे" इति क्तिन् । उत्तरसूत्रगतस्य उदात्तपदस्येहानुकर्षणादुदात्तः । ज्येष्ठस्य भावो ज्यैष्ठ्यम् ष्यञ् तदर्थं च सद्यः वृद्धः उत्साहवान् अजायथाः भवसि ॥ १ ॥

आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः ॥
शं ते सन्तु प्रचेतसे ॥ २ ॥

आ । त्वा । विशन्तु । आशवः । सोमासः । इन्द्र । गिर्वणः ॥
शम् । ते । सन्तु । प्रऽचेतसे ॥ २ ॥

आत्वेति । गीर्भिः स्तुतिभिर्वन्यते सेव्यते इति गिर्वणाः तस्य संबोधनं हे गिर्वणः हे इंद्र । वनषण संभक्तौ अस्मादसुन् । आशवः सवनत्रये प्रकृतिविकृत्योर्वा व्यापकाः । सोमासः सोमाः त्वामाविशंतु । किं च प्रचेतसे प्रकृष्टज्ञानाय ते तुभ्यं शं सुखरूपाः संतु ॥ २ ॥

त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो ॥
त्वां वर्धन्तु नो गिरः ॥ ३ ॥

त्वाम् । स्तोमाः । अवीवृधन् । त्वाम् । उक्था । शतक्रतो इति शतऽक्रतो ॥
त्वाम् । वर्धन्तु । नः । गिरः ॥ ३ ॥

त्वामिति । हे शतक्रतो स्तोमाः स्तोत्राणि त्वामवीवृधन् वर्धितवंति । किं च उच्यंत इति उक्था उक्थानि शस्त्राणि "पादृतुदिवचिरिचिसिचिभ्यस्थक्" इति वचेस्थक् । त्वां अवीवृधन्नित्यनुषज्यते । नः अस्माकं गिरः स्तुतयोपि त्वां वर्धंतु । अंतर्भावितण्यर्थाद्वृधेर्व्यत्ययेन परस्मैपदम् ॥ ३ ॥

अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम् ॥
यस्मिन्विश्वानि पौंस्या ॥ ४ ॥

अक्षितऽऊतिः । सनेत् । इमम् । वाजम् । इन्द्रः । सहस्रिणम् ॥
यस्मिन् । विश्वानि । पौंस्या ॥ ४ ॥

अक्षितोति इति । अक्षितोतिः अहिंसितरक्षणः । क्षि हिंसायाम् कर्मणि क्तः । इंद्रः सहस्रिणं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


सहस्रसंख्यायुक्तं इमं वाजं सोमरूपमन्नं सनेत् संभजेत् यस्मिन् वाजे विश्वानि सर्वाणि पौंस्या पुंस्त्वानि वर्तते। पुंसः कर्मणीत्यर्थे ब्राह्मणादित्वात् ष्यञ् ॥ ४ ॥

मा नो मर्ता अभि द्रुहन्तनूनामिन्द्र गिर्वणः ॥
ईशानो यवया वधम् ॥ ५ ॥

मा। नः। मर्ताः। अभि। द्रुहन्। तनूनाम्। इन्द्र। गिर्वणः ॥
ईशानः। यवय। वधम् ॥ ५ ॥

मा न इति। हे गिर्वणः इंद्र मर्ताः विरोधिनो मनुष्याः नः अस्माकं तनूनां माभिद्रुहन् अभितो द्रोहं मा कुर्युः। ईशानस्त्वं वधं वैरिभिश्चिकीर्षितं यवय अस्मत्तः पृथक्कुरु। यौतेर्णिचि "संज्ञापूर्वको विधिरनित्य" इति वृद्धिः। मर्ता इत्यत्र "असिहसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तनि"ति तन् ॥५॥

दशमो वर्गः ॥

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ॥
रोचन्ते रोचना दिवि ॥ १ ॥

युञ्जन्ति। ब्रध्नम्। अरुषम्। चरन्तम्। परि। तस्थुषः ॥
रोचन्ते। रोचना। दिवि ॥ १ ॥

युंजंतीति। दशर्चे सूक्ते आद्यास्तिस्रोंतिमा चेति चतस्र ऐन्द्र्यः अन्याः षट् मारुत्यः आसु "वीळु चित्" "इंद्रेणे"त्येते ऐन्द्र्यावपि तथा चानुक्रान्तं "सुरूपकृत्नुं दशैन्द्रमा तु युंजंत्यादहेत्येताः षण्मारुत्यो वीळुचिदिंद्रेणेत्यैंद्र्यौ चेति"। ब्रध्नं महांतं महान्नामसु पाठात्। रोषंति रुषाः इगुपधलक्षणः कः। न संति रुषा यस्येत्यरुषः "नञ्सुभ्यामि"त्यंतोदात्तत्वम्। चरंतं हविर्ग्रहीतुं प्रसरंतं इंद्रं ये परि तस्थुषः परितोऽवस्थिताः (प्राणिनः) युंजंति कर्मणि देवतात्वेन संबध्नंति। ते दिवि रोचना रोचंते प्रकाशंते। रोचना "अनुदात्तेतश्च हलादेरि"ति युच् ॥ १ ॥

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ॥
शोणा धृष्णू नृवाहसा ॥ २ ॥

युञ्जन्ति। अस्य। काम्या। हरी इति। विऽपक्षसा। रथे ॥
शोणा। धृष्णू इति। नृऽवाहसा ॥ २ ॥

युंजंतीति। अस्य इंद्रस्य रथे हरी अश्वविशेषौ युंजंति सारथयः। काम्या कामयितव्यौ। विपक्षसा विविधे पक्षसी ययोस्तौ। पक्ष परिग्रहे अस्मादसुन् "पक्षसी तु स्मृतौ पक्षा"वित्युत्तररत्ने। शोणा शोणवर्णौ धृष्णू प्रगल्भौ नृवाहसा नृणां पुरुषाणां इंद्रतत्सारथिप्रमुखानां वोढारौ। अस्येत्यत्र "इदमोन्वादेशेशनुदात्तस्तृतीयादावि"ति अश् अनुदात्तः ॥ २ ॥

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ॥
समुषद्भिरजायथाः ॥ ३ ॥

केतुम्। कृण्वन्। अकेतवे। पेशः। मर्याः। अपेशसे ॥
सम्। उषत्ऽभिः। अजायथाः ॥ ३ ॥

केतुमिति। मर्यान् मर्त्यान् असति गच्छति। मर्येषु असति तेषु प्रकाशते वा मर्याः। अस गतिदीप्त्यादानेषु क्विबन्तात्संबोधनम्। हे इंद्र अकेतवे ज्ञानरहिताय केतुं कृण्वन् प्रज्ञानं कुर्वन् अपेशसे अप्रकाशरूपाय पेशः उत्कृष्टं रूपं कुर्वन् त्वं उषद्भिः शत्रून् दहद्भिः रश्मिभिः। लटः शत्रादेशे शपि प्राप्ते व्यत्ययेन श्नः। संभूय अजायथाः आविरभवः ॥ ३ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



आदह॑ स्व॒धामनु॒ पुन॑र्गर्भ॒त्वमे॑रि॒रे ॥
दधा॑ना॒ नाम॑ य॒ज्ञियम् ॥ ४ ॥

आत् । अह॑ । स्व॒धाम् । अनु॑ । पुनः॑ । ग॒र्भ॒ऽत्वम् । आ॒ऽई॒रि॒रे॒ ॥
दधा॑नाः । नाम॑ । य॒ज्ञिय॑म् ॥ ४ ॥

आदहेति । निपातावेतौ आदित्यानंतर्ये अहेत्यवधारणे आदह वर्षतोरनन्तरमेव स्वधामनु उदकं लक्षीकृत्य स्वधाशब्दस्योदकनामसु पाठात् । पुनः प्रतिसंवत्सरं गर्भत्वं गर्भभावशब्दस्य भावितपरत्वं "यो वै भूमे"त्यादिवत् । ऐरिरे प्रेरितवंतः मेघमध्ये जलस्य गर्भाकारं संपादितवंत इत्यर्थः । अत्र च देवतात्वान्मरुतः कर्त्तारो बोध्याः कीदृशाः यज्ञियं यज्ञार्हं नाम दधानाः । एरिरे आङ्पूर्वात् ईर प्रेरणे अस्माल्लिट "इजादेश्चे"त्यान्न भवति मंत्रत्वात् । अहशब्दयोगान्निघाताभावः "तुपश्यपश्यताहैः पूजायामि"ति निषेधात् । ( यज्ञियं ) "यज्ञर्त्विग्भ्यां घखञावि"ति घः ॥ ४ ॥

वी॒ळु चि॑दारुज॒त्नुभि॒र्गुहा॑ चिदिन्द्र॒ वह्नि॑भिः ॥
अवि॑न्द उ॒स्रिया॒ अनु॑ ॥ ५ ॥

वी॒ळु । चि॒त् । आ॒रु॒ज॒त्नुऽभिः॑ । गुहा॑ । चि॒त् । इ॒न्द्र॒ । वह्नि॑भिः ॥
अवि॑न्दः । उ॒स्रियाः॑ । अनु॑ ॥ ५ ॥

वीळु चिदिति । अस्ति किंचिदुपाख्यानं । पणिभिरसुरैर्देवलोकाद्गावोऽपहृताः अंधकारे प्रक्षिप्ताः ताश्चेंद्रो मरुद्भिः सहाजयदिति । एतदभिप्रेत्योच्यते । वीळ्विति हे इंद्र वीळु चित् दृढमपि स्थानं आरुजत्नुभिः रुजो भंगे अस्मादौणादिकः कत्नुच् । वह्निभिः वोढृभिः मरुद्भिः सहितस्त्वं गुहा चित् गुहायामपि स्थापितवान् उस्रियाः गा अन्वविंदः । अन्विष्य लब्धवानसि ॥ ५ ॥

एकादशो वर्गः ॥

ॐ

दे॒व॒यन्तो॒ यथा॑ म॒तिमच्छा॑ वि॒दद्व॑सुं॒ गिरः॑ ॥
म॒हाम॑नूषत श्रु॒तम् ॥ १ ॥

दे॒व॒ऽयन्तः॑ । यथा॑ । म॒तिम् । अच्छ॑ । वि॒दत्ऽव॑सुम् । गिरः॑ ॥
म॒हाम् । अ॒नू॒ष॒त॒ । श्रु॒तम् ॥ १ ॥

देवयंत इति । देवान् मरुत्संज्ञकान् आत्मन इच्छंतो देवयंतः "सुप आत्मनः क्यच्" "न च्छंदस्यपुत्रस्ये"ति निषेधादीत्वदीर्घौ न । गृणंतीति गिरः स्तोतारः गृणातेः क्विप् । विदद्वसुं विदंतीति विदंति प्रसिद्धानि वसूनि यस्य तं । विदेः कर्मणि कर्तरि शना कर्मवद्भावेन यगात्मनेपदे तु न कर्तृस्थभावकत्वात् । महां महांतं नकारतकारयोर्लोपः छांदसः । यद्वा मह उत्सवः तमपयते इति महाः विच् । श्रुतं विख्यातं मरुद्गणं अच्छ अभिमुखं प्राप्तं । अध्याहृतधातुयोगादच्छेत्यस्य गतित्वं निपातत्वं च । अनूषत स्तुतवंतः णू स्तवने कुटादिर्दीर्घांतः व्यत्ययेन तङ् इडभावश्छांदसः । अत्र दृष्टांतः मतिं मंतारं इंद्रं यथा । "क्तिच्क्तौ च संज्ञायामि" ति मन्यतेः कर्तरि क्तिच् ॥ १ ॥

इन्द्रे॑ण॒ सं हि दृक्ष॑से संजग्मा॒नो अवि॑भ्युषा ॥
मन्दू॒ समा॑नवर्चसा ॥ २ ॥

इन्द्रे॑ण । सम् । हि । दृक्ष॑से । स॒म्ऽज॒ग्मा॒नः । अवि॑भ्युषा ॥
मन्दू॒ इति॑ । स॒मा॒नऽव॑र्चसा ॥ २ ॥

इंद्रेणेति । हे मरुद्गण अविभ्युषा भीतिरहितेनेंद्रेण संजग्मानः संगच्छमानः संदृक्षसे हि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



संदृश्येथाः खलु। प्रार्थनायां लेट् "लेटोडाटावि"त्यडागमः "सिब्बहुलं लेटी"ति सिप् "संज्ञापूर्वको विधिरनित्य" इति गुणो न। किं च मंदू मदि स्तुतिमोदमदकांतिगतिषु इदित्वान्नुम् बाहुलकात्कुः युवां समानवर्चसा तुल्यदीप्ती स्थः ॥ २ ॥

अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति ॥

गणैरिन्द्रस्य काम्यैः ॥ ३ ॥

अनवद्यैः। अभिद्युऽभिः। मखः। सहस्वत्। अर्चति ॥

गणैः। इन्द्रस्य। काम्यैः ॥ ३ ॥

अनवद्यैरिति। मखः यज्ञः अनवद्यैः निर्दोषै अभिद्युभिः अभिगता द्यौर्यैस्तैः। काम्यैः कमनीयैः गणैः मरुत्समूहैः सहितं इंद्रस्य इंद्रं सहस्वत् बलोपेतं यथा भवति तथा अर्चति पूजयति ॥३॥

अतः परिज्मन्ना गहि दिवो वा रोचनादधि ॥

सम्मस्मिन्नृञ्जते गिरः ॥ ४ ॥

अतः। परिऽज्मन्। आ। गहि। दिवः। वा। रोचनात्। अधि ॥

सम्। अस्मिन्। ऋञ्जते। गिरः ॥ ४ ॥

अत इति। हे परिज्मन् परितो व्यापिन् मरुद्गण। अजेः परिपूर्वस्य "श्वन्नुक्षन्नि"त्यादिना मन्प्रत्ययेऽकारलोप आद्युदात्तत्वं (आमन्त्रितनिघातेन) प्रत्याख्यायते अतः अस्मात्त्वत्स्थानादंतरिक्षादागहि आगच्छ रोचनाद्दीप्यमानाद्दिवः द्युलोकाद्वा अध्यागच्छ। यतः अस्मिन् मखे ऋत्विक् गिरः स्तुतीः समृंजते सम्यक् प्रसाधयति। ऋंजतिः प्रसाधनकर्मेति यास्कः। पूर्वमन्त्रोपात्तस्य मखस्यास्मिन्निति अन्वादेशात् "इदमोऽन्वादेशेशनुदात्तस्तृतीयादा"वित्यश् ॥ ४ ॥

इतो वा सातिमीमहे दिवो वा पार्थिवादधि ॥

इन्द्रं महो वा रजसः ॥ ५ ॥

इतः। वा। सातिम्। ईमहे। दिवः। वा। पार्थिवात्। अधि ॥

इन्द्रं। महः। वा। रजसः ॥ ५ ॥

इत इति। इतोस्मात्पार्थिवात् पृथिवीलोकाद्वा दिवो वा महः महतः प्रौढात् रजसः लोकात्। लोका रजांसि। अंतरिक्षलोकाद्वा सातिं धनदानं इंद्रं देवं अधीमहे आधिक्येन याचामहे याच्ञाकर्मसु ईमहे यामीति पाठात्। "तिङ्ङतिङ" इति निघातस्तु "चवायोगे प्रथमे"ति निषिध्यते ॥५॥

इति द्वादशो वर्गः ॥

॥ शिवाय नमः ॥

Shankracharya Mahavid... 1064



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.


# HISTORY AND CULTURE OF THE INDIAN PEOPLE

## PROJECTED BY THE BHARATIYA ITIHASA SAMITI

*General Editor* : R. C. Majumdar, M. A., Ph. D., F. R. A. S. B., Ex-Vice-Chancellor and Professor of History, Dacca University; Hon. Head of the Department of History, Bharatiya Vidya Bhavan.

*Assistant Editor* : A. D. Pusalker, M. A., LL. B., Ph. D., Assistant Director and Head of the Department of Sanskrit, Bharatiya Vidya Bhavan.

This great undertaking is projected in ten volumes. A team of authorities, under the aegis of the Bharatiya Itihasa Samiti founded by SHRI. K. M. MUNSHI, President, Bharatiya Vidya Bhavan and SHRI. G. D. BIRLA, Chairman of the Krishnarpan Charity Trust, has come together to present, with all the apparatus of the latest scholarship, no less than a full-scale account of the History and Culture of the Indian people.

An important difference should be noted between this and other histories of India on a similar scale. Hitherto it has been customary to assign equal space to the Hindu, Muslim and British periods, in spite of the 4000 years of the first, 400 or 500 of the second, and less than 200 of the last. The present undertaking strikes a truer balance, and in spite of the pausity of materials for the political history of ancient India, full account has been taken of the corresponding abundance on the cultural side. Accordingly the work is planned in three main divisions: Ancient, Mediaeval and Modern.

The work is fully illustrated with plates, maps and plans. Each volume will be announced separately, and the first, *Prehistoric India* is already under print.

*London* : GEORGE ALLEN & UNWIN LTD.

Orders may be also booked at

BHARATIYA VIDYA BHAVAN

Chowpatty Road, BOMBAY 7


Published by Prof. Jayantakrishna H. Dave, Hon. Registrar, Bharatiya Vidya Bhavan, 33-35, Harvey Road, Bombay 7.

Printed by Ramchandra Yesu Shedge, at the Nirnaya Sagar Press, 26-28, Kolbhat Street, Bombay 2

Funding by IKS-MoE